Shri Chandrashekhara Bharati Sadguru Shodashi

श्रीचन्द्रशेखरभारति सद्गुरुषोडशी

Document Information

Text title : Shri Chandrashekhara Bharati Sadguru Shodashi

File name : sadguruShoDashI.itx

Category : deities_misc, gurudev, ShoDasha

Location : doc_deities_misc

Proofread by : Ravi Venkatraman

Description/comments : Bhakta Kusumanjali Handful of Devtional Flowers on the Occasion of the Shri Chandrashekara Nakshatramahotsava (1912-1938) of Sri Chandrasekhara Bharati Swami of Sringeri

Latest update : October 17, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

Please help to maintain respect for volunteer spirit.

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 17, 2021

sanskritdocuments.org

श्रीचन्द्रशेखरभारति सद्गुरुषोडशी

शिवस्वरूपमिन्दुकान्तिशोभितं शिवङ्करं
 शिवाच्युताम्बुजोद्भवात्मकं मदान्तकप्रभुम् ।
द्विजार्चितं प्रजामहीमहेन्द्रसंश्रिताङ्घ्रिकं
 शृङ्गशैलपीठनाथमाश्रयामि सन्ततम् ॥ १॥

देशिकेन्द्रचन्द्रशेखराभिधानशोभिते
 श्रीनृसिंहभारतीशहस्तपद्मसम्भृते ।
शङ्करार्यसद्गुरुप्रतिष्ठितादिपीठगे
 खेलतु प्रतिक्षणं मनो मदीयमन्वहम् ॥ २॥

चाक्षुषाख्यया सुदक्षियैव मां पुरा प्रभु-
 र्यः क्षणेऽकरोद्गुजिष्यमक्षराम्बिकात्मकः ।
मीननेत्रया प्रदत्तयाज्ञयाश्रितो मया
 लोकदेशिकं तमेकमेव सन्ततं भजे ॥ ३॥

दण्डपाणिमण्डकोटिमण्डलार्चिताङ्घ्रिकं
 वैदिकाध्ववैरितूलचण्डमारुतं प्रभुम् ।
चण्डिकासरोजपादपूजकं बुधाग्रणी-
 ऋष्यशृङ्गमौनिराड्तपोवनेश्वरं भजे ॥ ४॥

भस्मपुण्ड्रपावकत्रिरेखया विराजितं
 सुधामयूखशेखराक्षमालया स्फुरद्गलम् ।
गुणत्रयात्मरेखयाप्यलङ्कृताब्जपीठगं
 चन्द्रशेखरार्यदेशिकं तमेकमाश्रये ॥ ५॥

आत्मरूपदर्शने सदाऽपि तुष्टमानसं
 भावनाख्यवेदशीर्षभावनाविशारदम् ।
पावनात्मविद्यया प्रकाशिताब्जवक्त्रकं
 देशिकेन्द्रचन्द्रशेखरार्यराजमाश्रये ॥ ६॥

हस्ततालमोदनेन वृष्टिकारकं प्रभुं
चक्रराजनायिकासमर्चकं तमोहरम् ।
शुद्धविद्ययाश्रितात्मशुद्धतत्त्वबोधकं
चन्द्रशेखरार्यदेशिकं भजे विमुक्तये ॥ ७॥

देवकीसुतेन सत्वमार्गपालनेच्छुना
प्रेषितं सुवर्णपक्षमामनन्ति यं गुरुम् ।
पञ्चनागबन्धने प्रभुं परात्मदर्शन -
प्रदं तमाश्रयामि चन्द्रशेखरार्यदेशिकम् ॥ ८॥

शिलासुवर्णयोर्दरिद्रवित्तशालिनोस्तथा
पङ्करत्नयोश्च मूर्खविज्ञयोर्जडार्ययोः ।
यक्षरक्षसोर्धुरीणमानुषाख्ययोरसौ
समप्रवृत्तिको जयत्यवाप्य मानसं गुरुः ॥ ९॥

धनेन कर्मणा प्रजाभिरोंपदार्थमव्ययं
कदाऽपि वा च न स्मेरदिति प्रबोधकं प्रभुम् ।
ज्ञानकारकं नतार्तिहारिणं सदा हृदा
कदा भजेऽञ्जलिं वहन्गुरुं भवाब्धितारकम् ॥ १०॥

विरागलोकसेवितं विरक्तिमार्गसूचकं
विद्ययाविलासवन्मुखं विनीतिनायकम् ।
विशङ्कटं विशारदं विशल्यभोगदायकं
विशुद्धतृप्तमानसं नमामि देशिकप्रभुम् ॥ ११॥

मन्दहासरम्यदन्तपङ्क्तिशोभिताननं
बिन्दुतत्त्वबोधकं निरन्तरेण योगिनाम् ।
अन्धकारपापहन्तृभास्करं शिवाऽद्वयं
बन्धमोचकं तमेकमाश्रयामि सद्गुरुम् ॥ १२॥

पादुकाऽमृतेन सर्वनम्रलोकरक्षकं
चाक्षुषामृतेन मोहनाशकं सदा नृणाम् ।
वाचिकामृतेन नैगमानुकूलशिक्षकं
मातृकाक्षरामृतात्मकं नमामि सद्गुरुम् ॥ १३॥

अखण्डमण्डलेश्वरत्रिखण्डमन्त्रबोधकं

विकुण्ठकुण्डलीशयात्मकं महाशिवार्चकम् ।
महाण्डकोटिमातृकाङ्घ्रिपङ्कजे सुभक्तिदं
प्रचण्डदुःखहारिणं शरण्यमाश्रये गुरुम् ॥ १४॥

तुलाख्यमेचके मखस्य सङ्गमे समुद्भवं
सुमेषकृष्णषष्ठ्युपागमेऽभिषिक्तमासने ।
सुखप्रदं नमत्ततेः शिवं शिवप्रदायकं
सुचन्द्रशेखरार्यदेशिकं तमेकमाश्रये ॥ १५॥

तवाङ्घ्रिपद्मयोरिमां नवां स्तुतिं समर्पये
गृहाण नम्यशारदाख्यपीठमध्यग प्रभो ।
सदाऽव मां सदाशिव श्रुते रहस्यबोधनैः
पुनर्नमामि देशिकेन्द्र चन्द्रशेखरार्य भोः ॥ १६॥

इति मन्त्रेश्वरशर्मणा विरचिता सद्गुरुषोडशी समाप्ता ।

(मधुरापुरिवास्तव्येन मुम्बापुरीस्थपत्रिकाप्रकटनाध्यक्षेण श्रीगुरुपादुकाशेखरेण मन्त्रेश्वरशर्मणा विरचिता)

(Author: Sri Madura S. Mantresvara Sarma, Journalist and Editor, Kaiser-i-Hind, Bombay.)

A garland of sixteen verses laid at the blessed feet of His Holiness Sri Chandrasekhara Bharati Mahaswamigal.

Proofread by Ravi Venkatraman

Shri Chandrashekhara Bharati Sadguru Shodashi
pdf was typeset on October 17, 2021

Please send corrections to *sanskrit@cheerful.com*